National Journal of
Hindi & Sanskrit Research

**ISSN: 2454-9177**
**NJHSR 2025;** 1(61): 61-66
© 2025 NJHSR
www.sanskritarticle.com

**Rahul Dan**
Research Scholar,
Bankura University Bankura,
West Bengal

**Correspondence:**
**Rahul Dan**
Research Scholar,
Bankura University Bankura,
West Bengal

# वैयाकरणानां मते तद्धिततुलनार्थपूरणार्थप्रत्ययानां विमर्शः

**राहुल दाँ**

**शब्दसंकेतसूची**

| | |
|---|---|
| अ.सू. | अष्टाध्यायीसूत्रपाठः |
| का.वृ. | काशिकावृत्तिः |
| दी.वृ. | दीक्षितवृत्तिः |
| पा.सू. | पाणिनीयसूत्रम् |
| पा. | पाणिनीयम् |
| म.भा. | महाभाष्यम् |
| वै.सि.कौ. | वैयाकरणसिद्धान्तकौमुदी |
| वै.सि.कौ.बा.म.टी. | वैयाकरणसिद्धान्तकौमुद्याः बालमनोरमाटीका |
| वै.सि.कौ.त.बो.टी. | वैयाकरणसिद्धान्तकौमुद्याः तत्त्वबोधिनीटीका |
| मु.व्या. | मुग्धबोधव्याकरणम् |
| पा. टी. | पादटीका |
| प.म.टी. | पदमञ्जरीटीका |
| स.प्र. | समासप्रकरणम् |
| सं.प्र. | संज्ञाप्रकरणम् |
| अथर्व. | अथर्ववेदः |
| यजु. | यजुर्वेदसंहिता |

**सारसंक्षेपः**

व्याकरणस्य प्रचलितं लक्षणं हि **"व्याक्रियन्ते व्युत्पाद्यन्ते प्रकृतिप्रत्ययादिविभागेन शब्दा अनेन इति व्याकरणम्"**। (वि- आङ्- कृ + ल्युट्करणे) इति व्युत्पत्तिगतव्याकरणशब्दस्यार्थः व्याकृतं विश्लेषणं वा। प्रति-इ+अच् प्रत्ययः अर्थात् प्रतिपूर्वकगमनार्थक-इ-धातोः परमच्प्रत्ययेन प्रत्ययशब्दो निष्पद्यते इति। प्रत्ययस्य पञ्चविभागेषु तद्धितप्रत्ययोऽन्यतमः इति। 'तस्मै हितम्' इत्यस्मात् अर्थात् समासबद्धः शब्दः हि तद्धितः। शब्दप्रयोगक्षेत्रेषु यत् हितकरं भवति स तद्धितः इति। तद्धितः हि निर्दिष्टप्रत्ययस्य एका संज्ञा इति। अपि च केचित् पण्डिताः उक्तवन्तः यत् तद्धितस्य तात्पर्यं हि अन्यपक्षे हितकरं परन्तु स्वपक्षे नेति। बोपदेवेन तस्य मुग्धबोधव्याकरणे उक्तम्- **"कृत्तद्धितसमासानामभिधानं नियामकम्"** अर्थात् अभिधानेन लौकिकव्यवहारेण वा कृत्तद्धितसमासप्रक्रिया नियन्त्रिता इति। **"तद्धिताः"(४।१।७६)- "तेभ्यः प्रसिद्धेभ्यः हिताः प्रत्ययाः तद्धितप्रत्यया उच्यन्ते"**। शब्देभ्यः परं ये प्रत्ययाः शिष्टप्रयोगानुसारेण विहिताः ते तद्धितप्रत्ययाः इति। इमे तद्धितप्रत्ययाः विविधार्थेषु व्यवह्रियन्ते। तेषु विविधार्थेषु बहवः तद्धिततुलनार्थप्रत्ययाः तद्धितपूरणार्थप्रत्ययाः च भवन्ति वैयाकरणानां मते। तुलनार्थप्रत्ययाः यथा- **ईयसुन्, इष्ठन्, तरप्, तमप्......चेति**। अपि च पूरणार्थप्रत्ययाः यथा- **तयप्, ड, मयट्, डट्, तीय, तमट्, मप्....चेति**। प्रत्येकानां तद्धिततुलनार्थपूरणार्थप्रत्ययानां व्याख्या अस्य शोधकार्यस्य विश्लेषणांशे मया स्पष्टरूपेण कृता इति शिवम्।

**कुञ्चिकाशब्दः-** प्रत्ययः, तद्धितः, ईयसुन्, इष्ठन्, तरप्, तयप्, मयट्, तमट्।

**भूमिका**

प्रति-इ+अच्= प्रत्ययः अर्थात् प्रतिपूर्वकगमनार्थक-इ-धातोः परमच्प्रत्ययेन प्रत्ययशब्दो निष्पद्यते इति। प्रत्ययशब्दस्यार्थः विश्वास इति। "अप्रत्ययं चेतः" "प्रत्ययं जनयामास" च काव्ये व्यवहारोऽस्ति। पारिभाषिकसंज्ञारूपेणमहर्षिपाणिनेः **"प्रत्ययः"**[1] एकमधिकारसूत्र-मिति। प्रत्ययशब्दस्य व्युत्पत्तिगतोऽर्थोऽस्ति यत्**- "अणुदित् सवर्णस्य चाप्रत्ययः"**[2] इति सूत्रे। सूत्रस्थप्रत्ययशब्दस्यार्थः खलु- **"प्रतीयते विधीयते इति प्रत्ययः"**[3] अर्थात् यः प्रतीतो विहितो वा भवति स प्रत्यय इति। यैः वर्णैः धातुना शब्देन सह वा मिलित्वा नवधातुरूपं नवशब्दरूपं वा निष्पद्यते ते प्रत्ययाः। आदौ प्रत्ययस्य द्वौ विभागौ स्तः, यथा- कृत्प्रत्ययः तद्धितप्रत्ययश्चेति। अपि च प्रत्ययस्य पञ्चविभागा अपि सन्ति, यथा-1.विभक्तिः 2.कृत्प्रत्ययः 3.तद्धितप्रत्ययः 4.स्त्रीप्रत्ययः
5.धात्ववयवः। वृत्तिशब्दस्य व्युत्पत्तिः खलु वृत् + क्तिन्। वृत्तेः लक्षणं हि- **"परार्थाभिधानं वृत्तिः"**[4] अर्थात् शब्देषु यः स्वस्यार्थः अस्ति तद्व्यतिरिक्तार्थेण या अभिहिता सा वृत्ति इति। अपि च सिद्धान्तकौमुदीकारेण आचार्यदीक्षितेन उक्तम्- **"परार्थस्य अभिधानं यस्यां यया वा"**[5]। यस्मिन् समन्वये समन्वयघटकानां पदानां स्वस्यार्थं विना अन्यार्थस्य ज्ञानं भवति सा एव वृत्तिः। वृत्तेः नामान्तरं खलु 'पदविधिः'। इयं वृत्तिः पञ्चविधा। **"कृत्तद्धितसमासैकशेषसनाद्यन्त-धातुरूपाः पञ्चवृत्तयः"**[6]। पञ्चवृत्तिषु द्वितीया वृत्तिः खलु तद्धितवृत्तिः। तद्धितवृत्तिरपि नवशब्दनिष्पन्नं क्रियते इति। इयं वृत्तिः केवलं शब्देन सह संयुज्यते इति। अपि च शब्देन प्रातिपदिकेन वा सह तद्धितप्रत्ययसंयुक्तो भूत्वा नवप्रातिपदिकं निष्पद्यते, यथा-दशरथ+इञ्= दाशरथि। अत्र दाशरथि इति एकं प्रातिपदिकमिति। प्रातिपदिकनिष्पन्नं सूत्रं हि**- "कृत्तद्धितसमासाश्च"**[7] इति। दशरथस्य अपत्यं पुमान् इत्यस्मिन् अर्थे दाशरथिः भवति। अत्र अपत्यार्थकेन इञ्प्रत्ययेन सह दशरथशब्दस्य समन्वयो भवति। अस्मिन् समन्वये केवलं दशरथशब्दस्यार्थः इञ्प्रत्ययस्यार्थश्च न प्रधानः। अपत्यार्थविशिष्टः दाशरथिशब्दस्यार्थः रामचन्द्रः एव प्रधानः इति। "तद्धिताः"[8] - "तेभ्यः प्रसिद्धेभ्यः हिताः प्रत्ययाः तद्धितप्रत्ययाः उच्यन्ते"। शब्देभ्यः परं ये प्रत्ययाः शिष्टप्रयोगानुसारेण विहिताः ते तद्धितप्रत्ययाः इति। इमे तद्धितप्रत्ययाः विविधार्थेषु व्यवह्रियन्ते। तेषु विविधार्थेषु बहवः तद्धिततुलनार्थप्रत्ययाः तद्धितपूरणार्थप्रत्ययाः च भवन्ति वैयाकरणानां मते। तुलनार्थप्रत्ययाः यथा- **ईयसुन्, इष्ठन्, तरप्, तमप्......चेति।** अपि च पूरणार्थप्रत्ययाः यथा- **तयप्, ड, मयट्, डट्, तीय, तमट्, मप्....चेति।**

**विश्लेषणम्**

**<u>तद्धितानां तुलनार्थता</u>**

'अतिशायने तमबिष्ठनौ'[9]- अस्य सूत्रस्य वृत्तौ अस्ति यत्- "अतिशयविशिष्टार्थवृत्तेः स्वार्थे एतौ स्तः"[10]। अत्र एतौ इति पदेन तमबिष्ठन्प्रत्ययौ बोध्येते। इमौ द्वौ प्रत्ययौ आतिशय्यार्थे भवतः वैयाकरणानां मते। अपि च वैयाकरणानां मते इमौ द्वौ प्रत्ययौ स्वार्थिकप्रत्ययौ स्तः। तत्र प्रकृतेः एव सम्पूर्णार्थवाचकता विद्यते। तस्य अर्थैव इमौ द्वौ प्रत्ययौ विहितौ स्तः। अष्टाध्यायाः पञ्चमाध्यायस्य तृतीयपादतः ये प्रत्ययाः विहिताः भवन्ति ते स्वार्थिकप्रत्ययाः इति। अतः तमबिष्ठन्प्रत्ययौ स्वार्थिकप्रत्ययौ स्तः। अतः काशिकायामस्ति- **"प्रकृत्यर्थविशेषणं च स्वार्थिकानां द्योत्यं भवति"**[11]। यथा-अयमेषामतिशयेनाढ्यः आढ्यतम इति। अपरमेकमुदाहरणं यथा-अयमेषामतिशयेन लघुः लघुतमः(तमप्), लघिष्ठः(इष्ठन्)। अपि च काशिकाकारेण उक्तम्- **"देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मणे, युधिष्ठिरः श्रेष्ठतमः कुरुणाम्( यदाच प्रकर्षवतां पुनः प्रकर्षो विवक्ष्यते तदातिशायिकान्ताद् अपरः प्रत्ययो भवत्येव........"**[12] । परन्तु भाष्यकारस्य समर्थाभावेन अनेकाः वैयाकरणाः काशिकायाः मतं समर्थितवन्तः। प्रकर्षबोधकप्रत्ययौ एकत्र द्वौ भवितुं नार्हतः। यथा-प्रसिद्धः प्रयोगोऽस्ति यत् श्रेष्ठतमाय कर्मणे एतत् सिद्ध्यर्थं ते छान्दसरूपेण द्वितीयतमप्प्रत्ययं स्वार्थिकरूपेण मन्यन्ते। अपि च युधिष्ठिरः श्रेष्ठतमः कुरुणामः अस्मिन् वाक्ये "श्रेष्ठतम इति प्रयोगः न यथार्थ इति"[13]। परन्तु अनेकाः वैयाकरणाः उक्तवन्तः यत्- "इष्टन्प्रत्ययात् परं तमप्प्रत्ययो भवितुमर्हति यतः सरूपप्रत्ययस्य विधानम् एकत्र न भवति परन्तु यदि विरुपो भवति तर्हि समस्या नास्ति"[14]।

'तिङश्च'[15]- अत्र दीक्षितेन उक्तम् "तिङन्तादतिशये द्योत्ये तमप् स्यात्"[15] अर्थात् तिङन्तशब्देभ्यः परम् अतिशयार्थे तमप्प्रत्ययो भवति। यथा- अयमेषामतिशयेन पचति पचतितमः।

'तरप्तमपौ घः'[17]- "एतौ घसंज्ञौ स्तः"[18]अर्थात् तरप्तमप्प्रत्ययौ घसंज्ञौ स्तः। आतिशय्यार्थे इमौ प्रत्ययौ भवतः।

'किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे'[19]- अस्य सूत्रस्यार्थः खलु "किम एतन्तात् तिङोऽव्ययाच्च परो यो घस्तदन्तद् आमुः स्यान्नतु द्रव्यप्रकर्षे"[20] । परन्तु द्रव्यस्य यदि प्रकर्षता बोध्यते तर्हि आमुप्रत्ययो न भवति। पचतितम इत्यत्र आमुप्रत्ययो भवति, यथा- पचतितमाम्। द्रव्यप्रकर्षे तु उच्चैस्तमस्तरु इति।

'द्विवचनविभज्योपपदे तरवीयसुनौ'[21]- अस्मिन् सूत्रे भट्टोजीदीक्षितेन उक्तम्- "द्वयोरेकस्यातिशये विभक्तव्ये चोपपदे सुप्तिङन्तादेतौ स्तः"[22]। सूत्रमिदं पूर्वसूत्रस्य विशेषक इति। यथा- अयमनयोरतिशयेन लघुः लघुतरः लघीयान् वा। अपि च उदीचीप्राचीप्रभृतिशब्देभ्यः परं तरप्-ईयसुन्प्रत्ययद्वयं भवति। यथा- पटुतराः, पटीयांसः। द्विवचनविभज्योपपद इति। द्वयोरर्थयोर्वचनं द्विवचनं करणे ल्युट् कर्मणि षष्ठ्या समासः। येन पदेन स्वावर्थावुच्येते तद्द्विवचनं विभक्तव्यं विभज्यम्। ऋहलोरिति ण्यति प्राप्ते तदपवादे। यत् निपात्यते ण्यति तु

चजोरिति कुत्वेन विभाग्यमिति स्यात्। निवृत्तप्रेषणात् धातोः प्राकृतेऽर्थे णिजिति णेरणाविति सूत्रे व्युत्पादनादिति दिक्। द्विवचनं विभज्यं चेति द्वन्द्वस्तस्य उपपदेन कर्मधारयस्तथा च द्व्यर्थवाचके विभजनीये चोपपदे सतीत्यक्षरार्थः। द्विवचनास्ते उपपदे इति व्याख्यायां तु दन्तोष्ठस्य दन्ता स्निग्धतरा इत्यादि न सिध्यति। अन्वर्थं चोपपदम्। उपोच्चारितं पदमिति न तु कृत्रिमम्। तद्धितविधौ तस्यासम्भवात्। इह द्वे उपपदे द्वे च सुवन्ततिङन्तरूपे प्रकृतौ द्वौ च प्रत्ययौ यथासंख्यं नेष्यते।

'अजादी गुणवचनादेव'[23]- "गुणवाचकाजादिशब्देभ्यः परं इष्ठन्नीयसुनौ प्रत्ययौ स्तः"[24]। यथा- प्रथिष्ठः, प्रथीयान्। नेह, पाचकतरः, पाचकतमः। इष्ठतोऽवधारणार्थ एवकारन्तेन प्रत्ययनियमोऽयम्। एवकाराभावे तु गुणवचनादजादिप्रत्ययावेवेति प्रकृतिनियमोऽपि सम्भाव्येत। तथा च पटुतरः पटुतमः इत्यादि न सिद्ध्येत्।

'तुश्छन्दसि'[25]- "तृन्तृजन्तादिष्ठन्नीयसुनौ स्तः"[26]। अर्थात् वेदे तृण्तृज्प्रत्ययान्ताभ्यां परम् इष्ठन्नीयसुनौ स्तः।

'तुरिष्ठेमेयस्सु'[27]- "तृशब्दस्य लोपः स्यादिष्ठेमेयःसु परेषु"[28]। यथा- अतिशयेन कर्त्ता करिष्ठः।

'प्रशस्यस्य श्रः'[29]- "अस्य श्रादेशः स्यादजाद्योः"[30]। अर्थात् अजादिप्रत्ययाः यदि पश्चात् विराजन्ते तर्हि प्रशस्य इति शब्दस्य स्थाने श्रादेशो भवति।

'प्रकृत्यैकाच्'[31]- "इष्ठादिष्वेकाच् प्रकृत्या स्यात्"[32]। अर्थात् इष्ठादिप्रत्ययाः यदि पश्चात् वर्तन्ते तर्हि एकाच्शब्दाः प्रकृतौ एव तिष्ठन्ति। यथा- श्रेष्ठः, श्रेयान्।

'ज्य च'[33]- "प्रशस्यस्य ज्यादेशः स्यादिष्ठेयसोः"[34] अर्थात् इष्ठेयसोः परं प्रशस्य इति स्थाने ज्यादेशो भवति। यथा- ज्येष्ठः।

'ज्यादादीयसः'[35]- ज्यशब्दस्य परम् ईयसुन्प्रत्ययस्य ईकारस्थाने आत् भवति आदेः परस्य इति। यथा- ज्यायान्

'वृद्धस्य च'[36]- "ज्यादेशः स्यादजाद्योः"[37] अर्थात् इष्ठेयसुन्प्रत्ययाभ्यां परं वृद्धशब्दस्य स्थाने ज्यादेशो भवति। ज्येष्ठः, ज्यायान्।

'अन्तिकबाढयोर्नेदसाधौ'[38]- अन्तिकबाढशब्दाभ्यां परम् इष्ठेयसुन्प्रत्ययद्वयं वर्तते तर्हि यथाक्रमेण नेदसाधशब्दौ आदेशौ भवतः। यथा- नेदिष्ठः, नेदीयान्।

'स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्राणां यणादिपरं पूर्वस्य च गुणः'[39]- "एषां यणादिपरं लुप्यते पूर्वस्य च गुणः इत्यादिषु"[40]। अर्थात् इष्ठादिप्रत्ययाः यदि पश्चात् वर्तन्ते तर्हि स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्रशब्दानाम् अन्तस्थितानां यणप्रत्याहारस्थितवर्णानां लोपो भवति। अपि च पूर्वस्वरस्य गुणो भवति। यथा- स्थविष्ठः, क्षेपिष्ठः। एवमीयसुन्प्रत्ययस्यापि भवति। ह्रस्वक्षिप्रक्षुद्रप्रभृतिशब्दाः पृथ्वादिगणे पठिताः। यथा- क्षेपिमा, क्षोदिमा।

'प्रियस्थिरस्फिरोरुबहुलगुरुवृद्धतृप्रदीर्घवृन्दारकाणां प्रस्थस्फवर्वंहिगर्वर्षित्रब्द्राघिवृन्दाः'[41]- "प्रियादीनां क्रमात् प्रादयः स्युरिष्ठादिषु"[42] अर्थात् इष्ठादिप्रत्ययाः यदि पश्चात् वर्तन्ते तर्हि प्रियस्थिरस्फिरोरुबहुलगुरुवृद्धतृप्रदीर्घवृन्दारकप्रभृतिशब्देषु स्थानेषु यथाक्रमेषु प्रस्थस्फवर्वंहिगर्वर्षित्रपद्राघवृन्दादेशाः भवन्ति। यथा प्रेष्ठः, स्थेष्ठः, वरिष्ठः, गरिष्ठः। एवमीयसुनि प्रेयान्। प्रियोरुबहुलगुरुदीर्घाणां पृथ्वादित्वादिमनिचि प्रेमेत्यादि।

'बहोर्लोपो भू च बहोः'[43]- "बहोः परयोरिमेयसोर्लोपः स्याद्बहोश्च भूरादेशः"[44] । बहुशब्दात् परम् इमनिजीयसुन्प्रत्यययोः लोपो भवति, अपि च बहुशब्दस्थाने भूरादेशो भवति। यथा- भूमा, भूयान्।

'इष्ठस्य इट् च'[45]- "बहोः परस्य इष्ठस्य लोपः स्याद् इडागमश्च"[46] । अर्थात् बहुशब्दात् इष्ठप्रत्ययस्य लोपो भवति, अपि च बहुशब्दस्थाने इडागमो भवति। यथा- भूयिष्ठः।

'युवाल्पयोः कनन्यतरस्याम्'[47]- "एतयोः कनादेशो वा स्यादिष्ठेयसोः"[48]। अर्थात् युवाल्पशब्दाभ्यां परं यदि इष्ठादिप्रत्ययाः सन्ति तर्हि विकल्पेन कनादेशो भवति। यथा- कनिष्ठः, कनीयान्। पक्षान्तरे यविष्ठः अल्पिष्ठश्च भवति।

'विन्मतोर्लुक्'[49]- "विना मतुपश्च लुक् स्यादिष्ठेयसोः"[50] । यथा- अतिशयेन स्रग्वी स्रजिष्ठः। स्रजीयान्।

**<u>तद्धितानां पूरणार्थता</u>**

**तयप्प्रत्ययः**

'संख्याया अवयवे तयप्'[51]- अवयवार्थे संख्यावाचकशब्देभ्यः परं तयप्प्रत्ययो भवति। यथा- चतुष्टयम्।

**प्रयोगः- चतुष्टयं युज्यते संहितान्तं जानुभ्यामूर्ध्वं शिथिरं कबन्धम्।**

(अथर्व. 10.2.31)

अवयवे वर्तमानात् संख्यावाचिनः प्रातिपदिकात् षष्ठ्यर्थे तयप् इति प्रत्ययो भवति। अवयवा अवयविनः सम्बन्धिनः इति सामर्थ्यात् अवयवी प्रत्ययार्थो विज्ञायते। चतुरवयवा अस्य चतुष्टयमिति। यथा प्रयोगे चतुष्टयं युज्यते संहितान्तम् अर्थात् चतुर् अवयवा अस्येति चतुष्टयं चतुष्प्रकारकं वा युज्यते संहितान्तम् इत्यवबोद्धव्यम्। अपरश्च प्रयोगो यथा तीर्त्वा वेदचतुष्टयीम् अर्थात् वेदस्य चतुरवयवरूपान् ऋग्यजुसामाथर्वान् तीर्त्वा उत्तीर्य समवगत्य इति। चतुरिति अवयवाधिकरणकसंम्बन्धीसंख्या इति शाब्दबोधः।

'द्वित्रिभ्यां तयस्यायज् वा'[52]- द्वित्रिशब्दाभ्यां परं तयप्प्रत्ययस्थाने विकल्पेन अयजादेशो भवति। यथा- द्वयम्, द्वितयम्।

'उभादुदात्तो नित्यम्'[53]- "उभशब्दात्तयपोऽयच् स्यात् स चाद्युदात्तः"[54]। अर्थात् उभशब्दात् परं तयप्प्रत्ययस्थाने नित्यः अयच्प्रत्ययो भवति, अपि च अयच्प्रत्ययान्तशब्दः आद्युदात्तो भवति। यथा- उभयम्।

**डप्रत्ययः**

'तदस्मिन्नधिकमिति दशान्ताड्डः'[55]- 'तदस्मिन् अधिकम्' इत्यस्मिन् अर्थे दशशब्दान्तशब्देभ्यः परं डप्रत्ययो भवति। यथा- एकादश अधिका अस्मिन् विग्रहे एकादशम्। परन्तु शतसहस्रयोरेवेष्यते नेह। एकादश अधिका अस्यां विंशतौ। अपि च प्रकृतिप्रत्ययार्थयोः समानजातीयत्वमेवेष्यते नेह, यथा- एकादश माषा अधिका अस्मिन् सुवर्णशते। तदस्मिन् पुनस्तदग्रहणमस्येति षष्ठ्यन्त सम्बन्धतदग्रहणनिरासार्थम्। प्रत्ययविधौ तदन्तविद्ध्यभावादाह। दशान्तादिति। अन्तग्रहणं किम्?। दश अधिका अस्मिन् शते। न चेह व्यपदेशिवद्भावेन दशान्तत्वमस्तीति वाच्यम्। व्यपदेशिवद्भावोऽप्रातिपदिकेत्यभ्युपगमात्।

**प्रयोगः- एकादशं शतं सोऽदाद् विद्वत्सेवानिधौ शिशुः।**

प्रथमासमर्थात् अधिकमिति अधिकोपाधिकात् दशान्तात् शब्दात् अस्मिन्निति सप्तम्यर्थे डप्रत्ययो भवति। एकादशमधिकमस्मिन् शते इति एकादशं शतम्। यथा प्रयोगेऽपि एकादशं शतं सोऽदात् अर्थात् स एकादशं अधिकमस्मिन् इति एकादशं शतम् अदात् दत्तवानिति। एकादशाभिन्नतदाश्रय इति शाब्दबोधः।

'शदन्तविंशतेश्च'[56]- डः स्यादुक्तेऽर्थे। अर्थात् तदस्मिन् अधिकम् इत्यस्मिन् अर्थे शदन्तरुपविंशतिशब्दात् परं डप्रत्ययो भवति। यथा- त्रिंशदधिका अस्मिन् त्रिंशं शतम्। विंशम्। प्रत्ययविधिस्तदादेस्त-दन्तस्येति परिभाषया तदादिनियमः स्यात्। तं वारयितुमन्तग्रहणम्। तेन एकत्रिंशम्। एकचत्वारिंशमित्यादि सिद्ध्यम्। नचैवं गोत्रिंश-दधिका अस्मिन् शते इत्यादावतिप्रसङ्गः शङ्क्यः। संख्यायाः अवयवे तयवितातः संख्याग्रहणानुवृत्तेः। अन्तग्रहणमिह विंशतिशब्दानन्तरं कर्तव्यम्। तेन एकविंशं शतमित्यादि सिद्ध्यत्यन्यथा ग्रहणवतेति तदन्तविधिप्रतिषेधादिह न स्यात्।

**मयट्प्रत्ययः**

'संङ्ख्याया गुणस्य निमाने मयट्'[57]- "भागस्य मूल्ये वर्तमानात् प्रथमान्तात् सङ्ख्यावाचिनः षष्ठ्यर्थे मयट् स्यात्"[58]। यथा- यवानां द्वौ भागौ निमानमस्योदश्विद्भागस्य द्विमयमुदश्विदयवानाम्। गुणस्येति किम्? । द्वौ ब्रीहियवौ निमानमस्योदश्वितः। निमाने किम्? । द्वौ गुणौ क्षीरस्य एकस्तैलस्य द्विगुणं क्षीरं पच्यते तैलेन।

**प्रयोगः- अणूनां द्विमयं दुग्धं यवानां त्रिमयं दधि।**

प्रथमासमर्थात् गुणस्य(भागस्य) निमाने (मूल्ये) वर्तमानात् संख्याशब्दात् षष्ठ्यर्थे मयट्प्रत्ययो भवति। यवानां द्वौ भागौ निमानं मूल्यमस्य उदश्विद्भागस्य द्विमयमुदश्वित् यवानामिति।

यथा प्रयोगे अणूनां द्वौ भागौ निमानं मूल्यमस्य दुग्धस्य इति द्विमयं दुग्धम् अणूनामिति। गुणोऽपि येन विमीयते मुल्यभूतेन सोऽपि सामर्थ्यात् भाग एव विज्ञायते। द्वि ह्यभिन्न गुणनिमानसम्बन्ध इति शाब्दबोधः।

'मयङ्वैतयोर्भाषायामभक्षाच्छादनयोः'[59]- "प्रकृतिमात्रान्मयट् वा स्याद्विकारावयवयोः"[60] अर्थात् विकारावयवार्थयोः प्रकृतिमात्रात् परं विकल्पेन मयट्प्रत्ययो भवति। यथा- अश्मनो विकारः अश्ममयम्। आश्मनम् (अवयवार्थे विकल्पपक्षे अञ्प्रत्ययो भवति)

'नित्यं वृद्धशरादिभ्यः'[61]- वृद्धशरादिशब्देभ्यः परं नित्यः मयट्प्रत्ययो भवति। यथा- आम्रमयम्। शरमयम्। एकाचो नित्यम्(वा.) अर्थात् एकाच्विशिष्टशब्देभ्यः परमपि नित्यः मयट्प्रत्ययो भवति। यथा- वाङ्मयम्। कथं तर्हि आप्यमस्मयमिति। तस्येदमित्यणन्तात् स्वार्थे ष्यञ्।

'गोश्च पुरीषे'[62]- पुरीषार्थे गोशब्दात् परं मयट्प्रत्ययो भवति। यथा- गोः पुरीषं गोमयम्। पुरीषं न विकारो नापावयवः तथापि तस्येदमित्यर्थेऽयं प्रत्ययः। विकारावयवस्तु गोपयसोर्यतं वक्ष्यति। पुरीषे किम्? । गव्यम् पयः।

'पिष्टाच्च'[63]- "मयट् स्याद्विकारे" । अर्थात् विकारार्थे पिष्टशब्दात् परं मयट्प्रत्ययो भवति। यथा- पिष्टमयं भस्म। तदा दीक्षितेन उक्तम्- कथं पैष्टी सुरेति। सामान्य विवक्षायां तस्येदनित्यण्।

'ब्रीहेः पुरोडाशे'[64]- पुरोडाशार्थे ब्रीहिशब्दात् परं मयट्प्रत्ययो भवति। विल्वाद्यणोऽपवादः। यथा- ब्रीहिमयः पुरोडाशः। अन्यार्थे ब्रैहम् इति।

'असंज्ञायां तिलयवाभ्याम्'[65]- असंज्ञार्थे तिलयवशब्दाभ्यां परं मयट्प्रत्ययो भवति। यथा- तिलमयम्, यवमयम्। परन्तु यदि संज्ञा बोध्यते तर्हि मयट्प्रत्ययो न भवति। यथा- तैलम्। यावकः।

'तालादिभ्योऽण्'[66]- तालादिशब्देभ्यः परम् अण्प्रत्ययो भवति। सूत्रमिदम् अञ्मयटोरपवादः। तालाद्धनुषि(वा.)- धनुः इत्यस्मिन् अर्थे तालशब्दात् परं मयट्प्रत्ययो भवति। यथा- तालं धनुः। अन्यार्थे तालमयम्। ऐन्द्रायुधम्। तालश्यामाकशब्दाभ्यां वृद्धत्वान्मयट् प्राप्तः। वर्हिणां विकारो वार्हम्। प्राणिरजतादिभ्योऽञ् ततो ञितश्च तत्प्रत्यादित्यञ् प्राप्तः। शेषेभ्यस्त्वनुदात्तादित्वादञ् प्राप्तः। तथा हि विशिदृशिभ्यामिन्द्रशब्द उपपदे मूल्यविभुजादित्वात् कः। अन्येषा-मपीति दीर्घः। इन्द्राविशः इन्द्रादृशः चापः सान्त्वने पचाद्यच्। चापेपि पूक्षाशब्दो लघावस्त इति मध्योदात्तः। इन्द्रायुधशब्दः समास-स्वरेणान्तोदात्तः। अण्ग्रहणं बाधकबाधनार्थं यथाविहितप्रत्ययविधौ वार्हिणशब्दाद्वृद्धलक्षणो मयट् स्यात्। ञितश्च तत्प्रत्ययादिताञो बाधनेन वचनस्य चरितार्थत्वमित्याहुः। तालाद्धनुषीति। गणसूत्रमिदम्। इह वृद्धलक्षणे मयट् प्राप्तः।

'ञितश्च तत्प्रत्ययात्'[67]- ञित् यो विकारावयवप्रत्ययस्तदन्तादञ् स्यात्तयोरेवार्थयोः। मयटोऽपवादः। यथा- शामीलस्य शामीलम्। ञितः किम्?। अर्थात् ञकारः यदि इत् न भवति तर्हि अञ्प्रत्ययो न भूत्वा मयट्प्रत्ययो भवति। यथा- वैल्वमयम्।

'तत्प्रकृतवचने मयट्'[68] प्राचुर्य्येण प्रस्तुतं प्रकृतं तस्य वचनं प्रतिपादनं तस्मिन् भवेऽधिकरणे वा ल्युट्। आद्ये अर्थात् भावल्युटन्तपक्षे यथा प्रकृतम् अन्नम् अन्नमयम्। अधिकरणल्युटन्तपक्षे यथा अन्नमयो यज्ञः। यद्यपि प्रकृतिशब्दः प्रस्तुतमात्रे रुढः तथापि वचनग्रहणादयं विशेषो लभ्यते। वचनग्रहणं हि यादृशस्य प्रकृतस्य लोके मयटा वचनं प्रत्यायनं तत्र यथा स्यादित्येवमर्थम्। आद्ये इति। प्रथमान्तात् प्रकृते द्योत्ये प्रत्ययः स्वार्थिकत्वात् प्रकृतितो लिङ्गम्। अपूपमयमित्यपि क्वचित् पठ्यते। द्वितीये त्वावश्यकं प्रथमान्तादेव प्रत्ययलाभार्थम्। अस्मिन् पक्षे उच्चमानता प्रकृत्यर्थविशेषणं ल्युटोक्तमधिकरणन्तु मयडर्थः।

'समूहवच्च बहुषु'[69]सामूहिकाः प्रत्यया अतिदिश्यन्ते। बह्वर्थे समूहवत्प्रत्ययो मयट्प्रत्ययश्च भवति। यथा- मोदकाः प्रकृताः। मौदकिकम्। द्वितीयेऽर्थे यथा- मौदकिको यज्ञः।

**डट्प्रत्ययः**

'तस्य पूरणे डट्'[70] पूरणार्थे डट्प्रत्ययो भवति। यथा- एकादशानां पूरणः एकादशः। उद्भूतावयवभेदः समुच्चयः प्रकृत्यर्थः। अवयवः प्रत्ययार्थः। इह यस्मात् संख्यावाचिनः प्रत्ययविधिस्तदीयप्रवृत्ति-निमित्तस्य एकादशत्वादेः पूरणे प्रत्यय इति।

**प्रयोगः- इन्द्रो एकादशे विश्वेदेवा द्वादशे** (यजु. 39/6)

तस्येति षष्ठीसमर्थात्संख्यावाचिनः शब्दात् पूरणेऽर्थे डट् इति प्रत्ययो भवति। पूर्यतेऽनेनेति पूरणम्। या संख्या पूर्यते स तस्याः पूरणः। यथा प्रयोगे इन्द्र एकादशे अर्थात् इन्द्रः एकादशसंख्यात्मकं स्थानं पूरयतीति एकादशे इत्युच्यते। संख्यासम्बन्ध्यभिन्नं पूरणम् इति शाब्दबोध।

'नान्तादसङ्ख्यादेर्म्मट्'[71] नकारान्तभिन्नसंख्यावाचकशब्देभ्यः परं पूरणार्थे डट्प्रत्ययस्थाने मट्प्रत्ययो भवति। यथा- पञ्चानां पूरणः पञ्चमः। नान्तात् किम्? । यथा- विंशः। असंख्यादेः किम्। यथा- एकादशः। डडिति प्रथमान्तस्यानुवृत्तस्य नान्तादिति पञ्चम्या षष्ठी कल्प्यते इति भावः। यद्यपीह मयटः प्रत्ययत्वेऽपि न क्षतिस्तथाप्युत्तरत्र मट आगमत्वमेवाभ्युपगन्तव्यम्। अन्ये प्याहुर्म्मटः प्रत्ययत्वे अकारसहितो मकारो विधेयः। आगमत्वे तु मकारमात्रमिति लाघवमन्तीति। विंश इति। विंशतेः पूरणः। ति विंशतेडितीति लोपः।

'षट्कतिकतिपयचतुरां थुक्'[72]- एषां थुगागमः स्याड्डुटि अर्थात् डट्प्रत्ययः यदि पश्चात् वर्तते तर्हि षट्कतिकतिपयचतुरशब्देभ्य परं थुक् आगमो भवति। यथा- षण्णां पूरणः षष्ठः। अपि च कतिपयशब्दस्यासङ्ख्यात्वेऽप्यत एव ज्ञापकाड्डुट्। यथा- कतिपयथः। चतुरश्छयतावाद्यक्षरलोपश्च(वा.) यथा- तुरीयः, तुर्य्यः।

'बहुपूगगणसङ्घस्य तिथुक्'[73]- डट्प्रत्ययो यदि पश्चात् वर्तते तर्हि बहुपूगगणसङ्घशब्देभ्यः परं तिथुक् आगमो भवति। अपि च पूगयङ्घयोरसङ्ख्यात्वेऽप्यत एव डट्। यथा- बहुतिथः।

'वतोरिथुक्'[74]- डट्प्रत्ययो यदि पश्चात् वर्तते तर्हि बहुप्रत्ययान्तशब्देभ्यः परम् इथुक्प्रत्ययो भवति। यथा- यावतिथः।

**तीयप्रत्ययः**

'द्वेस्तीयः'[75]- द्विशब्दात् परं तीयप्रत्ययो भवति। तीयप्रत्ययः डटोऽपवादः। यथा- द्वयोः पूरणः द्वितीयः।

'त्रेः सम्प्रसारणञ्च'[76]- त्रिशब्दात् परं तीयप्रत्ययो भवति, अपि च त्रिशब्दस्य सम्प्रसारणमपि भवति। यथा- तृतीयः।

**तमट्प्रत्ययः**

'विंशत्यादिभ्यस्तमङ् अन्यतरस्याम्'[77]- विंशत्यादिशब्देभ्यः परं डट्प्रत्ययस्थाने विकल्पेन तमट्प्रत्ययो भवति। यथा- विंशतितमः, विंशः। एकविंशतितमः, एकविंशः।

'नित्यं शतादिमासार्द्धमाससंवत्सराच्च'[78]- शतादिमासार्द्धमाससंवत्सर-शब्देभ्यः परं पूरणार्थे नित्यः तमट्प्रत्ययो भवति। यथा- शतस्य पूरणः शततमः। परन्तु मासादेरतएव डट्। यथा- मासतमः।

'षष्ठ्यादेश्चाऽसङ्ख्यादेः'[79]- असंख्यावाचकषष्ठ्यादिशब्देभ्यः परं डस्थाने तमट् आदेशो भवति। यथा- षष्ठितमः। परन्तु सङ्ख्यादेस्तु विंशत्यादिभ्य इति विकल्प एव। यथा- एकषष्ठः, एकषष्ठितमः।

**मप्प्रत्ययः**

'त्रेर्म्मं नित्यम्'[80]- "त्रिप्रत्ययान्तप्रकृतिकातृतीयान्तान्निर्वृत्तेऽर्थे मप् स्यान्नित्यम्"[81] इति दीक्षितेन उक्तम्। दीक्षितवचनस्यार्थः खलु तृतीयाविभक्त्यन्तत्रिप्रत्ययान्तप्रकृतेः परं तेन निर्वृत्तम् इत्यस्मिन् अर्थे नित्यः मप्प्रत्ययो भवति। यथा- कृत्या निर्वृत्तं कृत्रिमम्। **भावप्रत्ययान्तादिमप् वक्तव्यः(वा.)** यथा- पाकेन निर्वृत्तं पाकिमम्।

**मप्- पक्त्रिमम्- पक्त्रि + मप्**

**प्रयोगः- दुःखे जातुचिदागते स्वकलिताद् दुष्कर्मणः पक्त्रिमात्**

(विषु.गुण. , 22)

तृतीयासमर्थात् क्त्रिप्रत्ययान्तात् निर्वृते अर्थे नित्यं मप् इति प्रत्ययो भवति। पक्त्रिणा पाकेन निवृत्तं पक्त्रिमम्। यथा दुष्कर्मणः पक्त्रिमात् दुष्कर्मणः पाकेन पक्त्रिणा निवृत्तात् पक्त्रिमादिति। पक्त्रिकरणकनिवृत्त्याश्रय इति शाब्दबोधः।

**उपसंहारः**

वैयाकरणानां मते तद्धिततुलनार्थपूरणार्थप्रत्ययाः बहवः सन्ति। यथा- **ईयसुन्, इष्ठन्, तरप्, तमप्..... तयप्, ड, मयट्, डट्, तीय, तमट्, मप्....चेति** । इमे तुलनार्थपूरणार्थप्रत्ययाः वैयाकरणानां मते कुत्र कुत्र भवन्ति कुत्र कुत्र न भवन्ति तत् सुस्पष्टभावेन उल्लेखं कृतम् अस्मिन् शोधकार्ये इति। कार्यमिदं पठित्वा छात्राः उपकृताः भवन्ति। समाजस्यापि मङ्गलीभवति। प्रायः तुलनार्थपूरणार्थप्रत्ययानां सर्वेषां सूत्राणाम् अस्मिन् शोधकार्ये मया व्याख्या कृता इति शिवम्।

**परिशीलितग्रन्थपञ्जिः**

मिश्रः, रमाशङ्करः। सम्पादकः। अष्टाध्यायीसूत्रपाठः। मोतिलाल बनारसीदास। दिल्ली 110007। 2017।

जिज्ञासुः, ब्रह्मदत्तः। सम्पादकः। अष्टाध्यायीसूत्रपाठः। रामलालकपूर-ट्रास्ट। हरियाणा। 1977।

शर्मा, गिरिधरः; शर्मा, परमेश्वरानन्दः। सम्पादकौ। वैयाकरण-सिद्धान्तकौमुदी बालमनोरमा-तत्त्वबोधिनीव्याख्योपेता(2-भागः)। मोतिलाल बनारसीदास। दिल्ली 110007। 2012।

चक्रवर्ती, पार्वती। सम्पादिका। वैयाकरणसिद्धान्तकौमुदी (तद्धितपर्यालोचना, अपत्य-मत्वर्थ-आतिशय्यप्रत्ययः)। संस्कृत पुस्तक भाण्डारः। कलकाता 700006। वैशाख, 1421(2014)।

लाहिडी, प्रबोधचन्द्रः ; शास्त्री हृषीकेशः। पाणिनीयम्। दि ढाका स्टुडेन्टस् लाइब्रेरी। कलकाता 700073। जुलाइ, 2012।

भट्टाचार्य्यः, तपनशङ्करः। सम्पादकः। लघुसिद्धान्तकौमुदी। संस्कृत वुक डिपो। कलकाता 700006। मे, 2018।

बन्द्योपाध्यायः, अशोककुमारः। संस्कृत बांला अभिधान। संस्कृत पुस्तक भाण्डारः। कलकाता 700006। वइमेला, 1408।

पञ्जोली, श्रीबालकृष्णः। सम्पादकः। वैयाकरणभूषणसारः। चौखम्बा-संस्कृत-संस्थानम्। वाराणसी 221001।

शास्त्री, भार्गवः। सम्पादकः। व्याकरणमहाभाष्यम्(चतुर्थखण्डम्)। चौखाम्बा- संस्कृत- प्रतिष्ठानम्। दिल्ली 110007। 1998।

शास्त्री, द्वारिकादासः; शुक्लः, कालिकाप्रसादः। सम्पादकौ। काशिका-वृत्तिः (पाणिनीयाष्टाध्यायीव्याख्या, 4-भागः)। तारा पाब्लिकेशन्स। वाराणसी। 1967।

गङ्गोपाध्यायः, मृणालकान्तिः। सम्पादकः। वैयाकरणसिद्धान्तकौमुदी (संज्ञापरिभाषाप्रकरणम्)। संस्कृत वुक डिपो। कलकाता 700006। वैशाख, 1420।

**पाद टिप्पणी:**

[1]पा.सू. 3.1.1

[2] पा.सू. 1.1.69

[3] वै.सि.कौ.(सं.प्र.), पृ- 38

[4] वै.सि.कौ.(स.प्र.), पृ- 16

[5] वै.सि.कौ.(स.प्र.), पृ.- 17

[6] वै.सि.कौ(स.प्र.), पृ.- 16

[7] पा.सू. 1.2.46

[8] पा.सू. 4.1.76

[9] पा.सू.5.3.55

[10] दी.वृ.

[11] का.वृ.

[12] का.वृ. पा.सू.5.3.55

[13] प.म.टी.

[14] मु.व्या.(पा.टी.),पृ.- 365

[15] पा.सू.5.4.56

[16] दी.वृ.

[17] पा.सू.1.1.22

[18] दी.वृ.

[19] पा.सू.5.4.11

[20] दी.वृ.

[21] पा.सू.5.3.57

[22] दी.वृ.

[23] पा.सू.5.3.58

[24] दी.वृ.

[25] पा.सू.5.3.59

[26] दी.वृ.

[27] पा.सू.6.4.154

[28] दी.वृ.

[29] पा.सू.5.3.60

[30] दी.वृ.

[31] पा.सू.6.4.163

[32] दी.वृ.

[33] पा.सू.5.3.61

[34] दी.वृ.

[35] पा.सू.6.4.160

[36] पा.सू.6.3.62

[37] दी.वृ.

[38] पा.सू.5.3.63

[39] पा.सू.6.4.156

[40] दी.वृ.

[41] पा.सू.6.4.157

[42] दी.वृ.

[43] पा.सू.6.4.158

[44] दी.वृ.

[45] पा.सू.6.4.159

[46] दी.वृ.

[47] पा.सू.5.3.64

[48] दी.वृ.

[49] पा.सू.5.3.65

[50] दी.वृ.

[51] पा.सू.5.2.42

[52] पा.सू.5.2.43

[53] पा.सू.5.2.44

[54] दी.वृ.

[55] पा.सू.5.2.42

[56] पा.सू.5.2.46

[57] पा.सू.5.2.47

[58] दी.वृ.

[59] पा.सू.4.3.143

[60] दी.वृ.

[61] पा.सू.5.3.144

[62] पा.सू.5.3.145

[63] पा.सू.5.3.146

[64] पा.सू.5.3.148

[65] पा.सू.5.3.149

[66] पा.सू.5.3.152

[67] पा.सू.4.3.155

[68] पा.सू.5.4.21

[69] पा.सू.5.4.22

[70] पा.सू.5.4.48

[71] पा.सू.5.2.49

[72] पा.सू.5.2.51

[73] पा.सू.5.2.52

[74] पा.सू.5.2.53

[75] पा.सू.5.2.54

[76] पा.सू.5.2.55

[77] पा.सू.5.2.56

[78] पा.सू.5.2.57

[79] पा.सू.5.2.58

[80] पा.सू.4.4.20

[81] दी.वृ.